श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीकुमारवरददेशिक विरचिता

# ॥ श्रीमद्वेदान्तदेशिक दिनचर्या ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. Sundar Varadarajan of Chennai for proofreading this text.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमद्वेदान्तदेशिक दिनचर्या ॥

श्रीमल्लक्ष्मणयोगीन्द्रसिद्धान्तविजयध्वजम्।
विश्वामित्रकुलोद्भूतं वरदार्यमहं भजे॥

काञ्चीपुरी यस्य हि जन्मभूमिः विहारभूर्वेङ्कटभूधरेन्द्रः।
वासस्थली रङ्गपुरी तमीड्यं श्रीवेङ्कटेशं गुरुमाश्रयामः॥ १ ॥

संभावना यस्य हि कालकूटः सभा भुजङ्गी कुणपं तरुण्यः।
स्याद्रौरवं राजगृहं स जीयात् चिरं गुरुर्वेङ्कटनाथनामा॥ २ ॥

यः प्रातरभ्येत्य हरिं शुचीनि द्रव्याण्युपादाय शुचिः कृतेज्यः।
स्वाध्याययुक्तो निशि योगरूपां निद्रां समारोहति तं नतास्स्मः॥ ३ ॥

यामे तुरीये यतवाग्रजन्याः विहाय शय्यां विहिताङ्घ्रि शुद्धिः।
योऽत्यादरेणाऽऽस्थितयोगशेषः तं वेङ्कटेशं गुरुमाश्रयामः॥ ४ ॥

ततोऽनुसन्धाय ततिं गुरूणां तं चापि देवं रमणं रमायाः।
तत्कालयोग्यानि तथाविधानि हृद्यानि पद्यानि पठन्तमीडे॥ ५ ॥

उत्थाय गेहादुपगम्य रम्यां कवेरकन्यां कलिताङ्घ्रिशुद्धिः।
ततो विशोध्याऽप्सु निमज्ज्य शुभ्रं वस्त्रं वसानं तमहं स्मरामि॥ ६ ॥

धृत्वोर्ध्वपुण्ड्राणि सरोजबीजमालामवन्ध्यां समुपास्य सन्ध्याम्।
सावित्रमीशं सवितुस्त्वथर्चा स्तुवन्तमेकाग्रधिया स्तुवे तम्॥ ७ ॥

ततस्स पौर्वाह्णिकनित्यकर्म निर्वर्त्य नित्येष्टनिवृत्तिमार्गः।
श्रीरङ्गधामोपसमेत्य सेवाक्रमेण रङ्गेश्वरपादमूलम्॥ ८ ॥

www.prapatti.com

प्राबोधिकीभिः प्रतिबोध्य गीर्भिः प्रसाद्य तद्वद्यमुखैः प्रबन्धैः।
आशास्य तन्मङ्गळमाप्तवाक्यैः आपादचूडं कलयन्तमीडे॥ ९ ॥

तीर्थप्रसादादिकमत्र लब्ध्वा विज्ञाप्य देवाय ततो विसृष्टः।
शनैरुपेत्याऽऽश्रमकल्पमात्मगृहं सुखासीनमहं स्मरामि॥ १० ॥

व्याख्यानशालामुपगम्य चाथ शिष्याननन्यान् श्रवणाभिमुख्यान्।
सङ्ग्राहयन्तं सकलानि तन्त्राणि अतन्द्रितं तं गुरुमाश्रयेऽहम्॥ ११ ॥

तास्संस्कृतद्रामिडदिव्यसूक्तीः प्रसन्नगंभीरतया प्रसिद्धाः।
तत्तद्रुचिभ्यस्तनयाविशेषं प्रणौमि दान्तं प्रतिपादयन्तम्॥ १२ ॥

शिष्यैरुपादानपरैरनन्यैः समर्पितं भक्तिपुरस्सरं यत्।
तेनैव शुद्धेन यथोदितेन तुष्यन्तमीडे तुषतुल्यरुक्मम्॥ १३ ॥

इत्थं ह्युपादाय च शास्त्रशिक्षां तां चाप्युपादानपदे निवेश्य।
माध्याह्निकं कर्म समाप्य पश्चात् वन्दे यजन्तं वरदं सदारम्॥ १४ ॥

अतस्करग्राह्यपवित्रपात्रैः अनिन्द्रियोन्मादकरैर्हविर्भिः।
आराध्य देवं कमलासहायं आराधये तं विहितानुयागम्॥ १५ ॥

यामे चतुर्थे निहतारिवर्गं प्रबन्धनिर्माणविलोकनाद्यैः।
तथा पुराणाद्यवलोकनैश्च कालं क्षिपन्तं कलये गुरुं तम्॥ १६ ॥

सायन्तनं कर्म समाप्य पश्चात् समेत्य च श्रीवरदाह्वयस्य।
सहान्तरङ्गैः कुलदैवतस्य समीपमारात् प्रणतं स्मरामि॥ १७ ॥

आशास्य तन्मङ्गळमच्युतस्य तत्तत्प्रबन्धैश्च तदीयपङ्क्तिम्।
स्तुत्वैकतानं प्रतिगृह्य तीर्थप्रसादमेनं कृतकृत्यमीडे॥ १८ ॥

अथान्तरङ्गैरुपदेवगेहं अध्यास्य पीठं सरसैर्वचोभिः।
तेषां सुसूक्ष्मार्थविशेषशिक्षां कुर्वाणमीडीमहि वेङ्कटेशम्॥ १९ ॥

शिष्याननुज्ञाप्य सुसूक्ष्मबुद्धीन् कृतप्रणामान् कृपया गृहेभ्यः।
अध्यास्य शुद्धं शयनीयमत्र योगाय सन्नद्धमहं स्मरामि॥ २० ॥

हृत्पुण्डरीके वरदं सदारं निवेश्य तत्पादसरोजयुग्मे।
आबद्धचित्तं सुसुखं शयानं आराधये देशिकमस्मदीयम्॥ २१ ॥

योगस्वरूपामनुभूय निद्रां यामे तुरीये प्रतिबुध्य भूयः।
स्वस्वामिभावाकलनात्मयोगं भजे भजन्तं गुरुवेङ्कटेशम्॥ २२ ॥

इत्येवमेतामिह सर्वतन्त्र स्वतन्त्रवेदान्तगुरूत्तमस्य।
नित्याभिजप्यां शुभनित्यचर्यां जपन्ति ये ते दुरितं तरन्ति॥ २३ ॥

॥ इति श्रीमद्वेदान्तदेशिक दिनचर्या समाप्ता ॥

www.prapatti.com